श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नासदीयसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नासदीयसूक्तम् ॥

नास॑दासी॒न्नो सदा॑सीत्त॒दानी॓म्।
नासी॒द्रजो॒ नो व्यो॑मा प॒रो यत्।
किमाव॑रीव॒ः कुह॒कस्य॒ शर्म॑न्न्।
अम्भ॒ः किमा॑सी॒द्गह॑नं गभी॒रम्।
न मृ॒त्युर॒मृत॒ं तर्हि॒ न।
रात्रि॑या॒ अह्न॑ आसीत्प्रके॒तः।
आनी॑दवा॒तग्ग् स्व॒धया॒ तदेक॓म्।
तस्मा॓द्धा॒न्यं न प॒रः किञ्च॒नास॑।
तम॑ आसी॒त्तम॑सा गू॒ढमग्रे॓ प्रके॒तम्।
स॒लि॒लग्ं सर्व॑मा इ॒दम्॥ **1**॥

तु॒च्छेना॒भ्वपि॑हित॒ं यदासी॓त्।
तम॑स॒स्तन्म॑हि॒ना जा॑य॒तैक॓म्।
काम॒स्तदग्रे॒ सम॑वर्त॒ताधि॑।
मन॑सो॒ रेत॑ः प्रथ॒मं यदासी॓त्।
स॒तो बन्धु॒मस॑ति॒ निर॑विन्दन्न्।
हृ॒दि प्र॒तीष्या॑ क॒वयो॑ मनी॒षा।

ति॒र॒श्चीनो॒ वित॑तो र॒श्मिरे॑षाम्।
अ॒धस्वि॑द॒सी(३) दु॒परि॑स्विदासी(३)त्।
रे॒तो॒धा आ॑सन्महि॒मा न॑ आसन्न्।
स्व॒धा अ॒वस्ता॒त्प्रय॑तिः प॒रस्ता॑त्॥ **2**॥

को अ॒द्धा वे॑द॒ क इ॒ह प्रवो॑चत्।
कुत॒ आजा॑ता॒ कुत॑ इ॒यं वि॒सृ॑ष्टिः।
अ॒र्वाग्दे॒वा अ॒स्य वि॒सर्ज॑नाय।
अथा॒ को वे॑द॒ यत॑ आब॒भूव॑।
इ॒यं विसृ॑ष्टि॒र्यत॑ आब॒भूव॑॥ **3**॥

यदि॑ वा द॒धे यदि॑ वा॒ न।
यो अ॒स्याध्य॑क्षः पर॒मे व्यो॑मन्न्।
सो अ॒ङ्ग वे॑द॒ यदि॑ वा॒ न वेद॑।
किग्ग्स्वि॒द्वनं॒ क उ॒स वृ॒क्ष आ॑सीत्।
यतो॒ द्यावा॑पृथि॒वी निं॑ष्टत॒क्षुः॥ **4**॥

मनीं॑षिणो॒ मनं॑सा पृ॒च्छतेदु॒ तत्।
यद॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्न्॑।
ब्रह्म॒ वनं॑ ब्रह्म॒ सवृ॒क्ष आ॑सीत्।
यतो॒ द्यावा॑पृथि॒वी निं॑ष्टत॒क्षुः।
मनीं॑षिणो॒ मनं॑सा॒ विब्र॑वीमि वः।
ब्रह्मा॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्न्॑॥ **5**॥

ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

**॥ इति नासदीयसूक्तं समाप्तम् ॥**